# Shri Bala Mantrakavacha Stotram

# श्रीबालामन्त्रकवचस्तोत्रम्

## Document Information

Text title : Shri Bala Mantrakavacha Stotram or Bala Tripurasundari Kavacham

File name : bAlAmantrakavachastotram.itx

Category : devii, dashamahAvidyA, devI, kavacha, mantra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : July 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 7, 2023

*sanskritdocuments.org*

# श्रीबालामन्त्रकवचस्तोत्रम्

ॐ अस्य श्रीबालात्रिपुरसुन्दरीकवचमहामन्त्रस्य
श्रीदुर्वासा ऋषिः, अनुष्टुप् छन्दः,
श्रीबालात्रिपुरसुन्दरी देवता, ऐं बीजं, क्लीं शक्तिः,
सौः कीलकं, धर्मार्थ-काम-मोक्षप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

अथ करन्यासः ।
ॐ ऐं अङ्गुष्ठाभ्यां नमः ।
ॐ क्लीं तर्जनीभ्यां नमः ।
ॐ सौः मध्यमाभ्यां नमः ।
ॐ ऐं अनामिकाभ्यां नमः ।
ॐ क्लीं कनिष्ठिकाभ्यां नमः ।
ॐ सौः करतलकरपृष्ठाभ्यां नमः ॥

अथाङ्गन्यासः ।
ॐ ऐं हृदयाय नमः ।
ॐ क्लीं शिरसे स्वाहा ।
ॐ सौः शिखायै वषट् ।
ॐ ऐं कवचाय हुम् ।
ॐ क्लीं नेत्रत्रयाय वौषट् ।
ॐ सौः अस्त्राय फट् ॥

अथ ध्यानम् ।
अरुणकिरणजालै रञ्जिताशावकाशा
विधृतजपवटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या फुल्लकह्लारसंस्था
निवसतु हृदि बाला नित्यकल्याणरूपा ॥

ॐ ऐं, क्लीं, सौः, ऐं, क्लीं, सौः स्वाहा ।

ॐ आधारे तरुणार्कबिम्बरुचिरं हेमप्रभाभास्वरं
बीजं मान्मथमिन्द्रगोपसदृशं हृत्पङ्कजे संस्थिताम् ।
रन्ध्रे ब्रह्मपदं च शाक्तमपरं हेमप्रभाभास्वरं
ये ध्यायन्ति पदद्वयं तव शिवे ते यान्ति शैवं पदम् ॥

(एवं ध्यात्वा जपेद्धर्मं सर्वकर्मसमृद्धये ।)
ऐङ्कारी मे शिरः पातु क्लीं कारी हृदयं मम ।
सौः पातु पादयुग्मं मे सर्वाङ्गं सकलाऽवतु ॥ १॥

वाग्देवी मे शिरः पातु भालं पातु कुमारिका ।
भ्रूयुग्मं शाङ्करी पातु श्रुतियुग्मं गिरीश्वरी ॥ २॥

नेत्रे त्रिनेत्रवरदा नासिकां मे महेश्वरी ।
ओष्ठौ मे सुभगा पातु चुबुकं नववार्षिका ॥ ३॥

कपोले कमनीयाऽव्यात्कण्ठे कामार्चिताऽवतु ।
बाहू पातु वराभीतिधारिणी संप्रदायिनी ॥ ४॥

वक्षस्त्रिकं च पद्माक्षी कुचौ काञ्चीनिवासिनी ।
उदरं सुन्दरी पातु नाभिं नागेन्द्रवन्दिता ॥ ५॥

पार्श्वे पाशवहा पातु पृष्ठं पापविनाशिनी ।
कटीं कर्पूरहृद्देशी (विद्येशी) जघनं ललिताम्बिका ॥ ६॥

मेढ्रं महेशरमणी पातु मां भाललोचना ।
जानुनी जयदा पातु गुह्यं विद्याप्रदायिनी ॥ ७॥

पादौ निशार्चिता पातु प्रपदं त्रिपुरेश्वरी ।
सर्वाङ्गं सर्वदा पातु बाला त्रिपुरसुन्दरी ॥ ८॥

वित्तं वित्तेश्वरी पातु पशून्पशुपतिप्रिया ।
पुत्रान् पुत्रप्रदा पातु दानधर्मप्रदायिनी ॥ ९॥

क्षेत्रं क्षेत्रेशवनिता गेहं गम्भीरनादिनी ।
पातु धर्ममयी सर्वं शर्वसर्वेश्वरी रमा ॥ १०॥

इत्येतत्कवचं पुण्यं सर्वपापप्रणाशनम् ।
सर्वसौभाग्यजनकं सर्वरोगनिबर्हणम् ॥ ११॥

फलश्रुतिः -

विषज्वरहरं भूतवेतालादिनिबर्हणम् ।
अपस्मारगदाशूलनेत्ररोगादिनाशनम् ॥ १२॥

पठ्यमानं तु सततं बहुदुःखापहं नृणाम् ।
जपेत्कुमारीकवचं त्रिकालेषु त्रिमासकम् ॥ १३॥

मुच्यते सकलाद्रोगात् कञ्चुकादिव पन्नगः ।
पठेद्यः प्रयतो वर्षं कुमारी तस्य सिद्धिदा ॥ १४॥

गङ्गातरङ्गविलसच्छीकराक्तमुखाम्बुजा ।
निष्कलङ्का प्रसन्नास्या सुधासिन्धुसमुज्ज्वला ॥ १५॥

अनेकमन्त्रराजोऽयमशेषं यो जपेन्नरः ।
तस्य संरक्षणं मन्त्रं वर्षमात्रस्य संशयः ॥ १६॥

प्रातःकाले तु सलिलं ब्राह्मणः प्रयतः शुचिः ।
मन्त्रं जपन् त्रिरावृत्त्या वर्मसिद्धो भवेन्नरः ॥ १७॥

अस्य मन्त्रप्रभावेन व्याख्याता स भवेद्ध्रुवम् ।
यद्दुस्साध्यतमं कार्यं तत्तु साध्यं भवेज्जपात् ॥ १८॥

तत्तस्तोत्रेण लभते नात्र कार्या विचारणा ।
करस्थं काञ्चनं कृत्वा कवचं स महान्भावेत् ॥ १९॥

बहुनाऽत्र किमुक्तेन सर्वकार्येषु सर्वदा ।
यद्यदर्थे प्रयत्नः स्यात्तत्तदर्थमिदं जपेत् ॥ २०॥

इति श्रीबालामन्त्रकवचस्तोत्रं सम्पूर्णम् ।

बालात्रिपुरसुन्दरीकवचम् च ।

Proofread by PSA Easwaran

*Shri Bala Mantrakavacha Stotram*

pdf was typeset on July 7, 2023

Please send corrections to *sanskrit@cheerful.com*